RKMVU/Int MA/San/UT-1/12-17/D2016/SK-101

# SK-101-कठोपनिषत्

**लेखनाय कालः –होरा** **दिनाङ्कः ०६।०८।२०१६**

---

## A)पञ्च प्रश्नान् वाक्येनोत्तरत । 1*5=5

1. मन्त्रम् पूरयत – "लोकादिमग्निम्..."
2. मन्त्रम् पूरयत – "त्रिणाचिकेतस्त्रिभिरेत्य..."
3. मन्त्रम् पूरयत – "त्रिणाचिकेतस्त्रयमेतद्..."
4. उपनिषच्छब्दस्य व्याकृतिः का ।
5. उपनिषच्छब्दस्य निरुक्तिः का ।
6. श्रीशङ्करभगवत्पूज्यपादानाम् परमगुरूणां नाम किम् ।
7. श्रुतिप्रस्थानमित्यत्र श्रुतिशब्देन किं विवक्षितम् ।

## B) पञ्च व्याख्यात । 3*5=15

1. यमः।
2. नचिकेताः।
3. स्वर्ग्योऽग्निः।
4. "श्रद्धाऽऽविवेश सोऽमन्यत ।"
5. "सर्वथा अतिथिरनुपेक्षणीयः।"
6. "तवैव वाहास्तव नृत्यगीते ।।"

## C) अभीष्टमेकं व्याख्यात । 5*1=5

1. कठोपनिषदमधि भाष्यस्यारम्भे हेतवः।
2. उपनिषच्छब्दस्य निरुक्तिः।

*************

RKMVU/Int MA/San/14-19/UT1/D2016/SK-125

# SK-125 गीताशांकरभाष्यम्

**Marks-25** **Date-03/08/2016**

========================================

## A)संक्षेपेण उत्तरत। 1x5=05

1. मङ्गलश्लोकस्थ-अण्डशब्देन किमभिधीयते?
2. कैः गुणैः सदा सम्पन्नः भगवान्?
3. संसारबीजभूतौ कौ?
4. किमर्थमर्जुनं प्रत्येवोपदेशः कृतः भगवता?
5. षड्भावविकाराः के?
6. गीताशाङ्करभाष्यस्य व्याख्याद्वयं लिखत।
7. किं नाम नित्यत्वम्?

## B)नातिविस्तरेण उत्तरत। 3x5=15

1. गीताशास्त्रस्य अनुबन्धचतुष्टयम्।
2. मङ्गलश्लोकस्य तात्पर्यार्थः।
3. द्विविधो हि वेदोक्तो धर्मः।
4. ज्ञानकर्मसमुच्चयवादः।
5. कृष्णावतारस्य उद्देश्यम्।
6. लोकसंग्रहार्थं ज्ञानिनां कर्माचरणम्।
7. ज्ञानकर्मसमुच्चयवादे पूर्वपक्षः।

## C)लघून्यासं कुरुत। 5x1=05

1. गीतोपोद्घातभाष्यं यथाग्रन्थं संक्षिपत।

RKMVU/Int MA/San/UT1/12-17/D2016/SK-126

# SK-126 श्रीमद्भगवत्गीता १३,१५, १८

**कालावधिः - होरा** **दिनाङ्कः 03-08-2016** **पूर्णाङ्काः -25**

## A)अष्टानाम् एकेन वाक्येन समाधानं लिखत। 1*8=8

1. न हि "…..........." इति कस्मिंश्चित् कार्ये नियुक्ते, विष्णुमित्रः अहं नियुक्त इति तत्रस्थं नियोगं शृण्वन्नपि प्रतिपद्यते।
2. "द्वाविमावथ पन्थानौ" इत्यादिना व्यासेन प्रदर्शितौ पन्थानौ कौ?
3. न ह्यूषरदेशं स्नेहेन........... कर्तुं शक्नोति मरीच्युदकम्।
4. असम्प्रदायवित् सर्वशास्त्रविदपि …...........।
5. न हि गोमत्युपलभ्यमाने"…..........." इति प्रश्नो अर्थवान् भवेत्।
6. कर्तृत्वभोक्तृत्वलक्षणः कः?
7. क्षेत्रम् इति शब्दस्य व्युत्पत्तिं लिखत।
8. अष्टधा भिन्ना त्रिगुणात्मिका प्रकृतिः अपरा इत्युच्यते तत्र कः हेतुः?
9. अपराप्रकृतेः अष्टौ विभागाः के?
10. सर्पान् कुशाग्राणि तथोदपानं..........तथा विशिष्टम्।

## B)संक्षेपेण उत्तरत। 4*3=12

1. त्रयोदशोध्यायस्य आद्यं श्लोकं पूर्वपीठिकाभाष्येन सह व्याख्यात।
2. अविद्यायाः आत्मधर्मत्वं यथाभाष्यं निरस्यत।
3. जीवब्रह्माभेदे पूर्वपक्षमुपस्थाप्य खण्डयत।।
4. आनुमानिकात्मविद्यायाः अपरोक्षभ्रमनिवर्तकत्वं नास्तीति विवेचयत।
5. सुखदुःखादीनामात्मधर्मत्वं निराकुरुत।
6. जीवब्रह्माभेदे समाक्षिप्तं शास्त्रानर्थक्यदोषं यथाभाष्यं परिहरत।

## C)एकं विशदयत। 5*1=5

1. त्रयोदशोध्यायस्य द्वितीयं श्लोकं यथाभाष्यं व्याख्यात।
2. भगवत्पादानां भाष्यशैलीं तद्गतानि वैशिष्ट्यानि च प्रदर्शयत।

RKMVU/Int MA/San/UT1/12-17/D2016/SK-132

**SK-132 ब्रह्मसूत्रम् 1-3,4**

**कालावधिः होरा** **दिनाङ्कः 01-08-2016** **पूर्णाङ्काः - 25**

---

**A)पञ्चानाम् एकेन वाक्येन उत्तरत। 1*5=5**

1. द्युभ्वाद्यधिकरणस्य विषयवाक्यं लिखत।
2. "नानुमानमतच्छब्दात्" इति सूत्रे अनुमानशब्दार्थः कः?
3. प्राणभृत् शब्दवाच्यः कः?
4. सम्प्रसादशब्देन सिद्धान्ते कः अभिप्रेतः?
5. अक्षराधिकरणस्य विषयवाक्यं लिखत।
6. भूमाधिकरणस्य विषयवाक्यं लिखत।
7. द्युभ्वाद्यधिकरणस्थं सूत्रपञ्चकं यथामति लिखत।

**B)संक्षेपेण उत्तरत। 3*5=15**

1. भूमाधिकरणस्य पूर्वपक्षं यथाभाष्यं व्याख्यात।
2. "द्युभ्वाद्यायतनं स्वशब्दात्" इति सूत्रं व्याख्यात।
3. अक्षराधिकरणस्य पूर्वपक्षं भाष्यानुगुणमारचयत।
4. अक्षराधिकरणस्य सिद्धान्तपक्षं निरूपयत।
5. जीवात्मनः द्युभ्वाद्यायतनत्वं यथामति निराकुरूत।
6. अधिकरणलक्षणं लिखित्वा व्याख्यात।
7. भूमाधिकरणस्य सिद्धान्तपक्षं संगृह्णीत।

**C)एकं विशदयत। 5*1=5**

1. द्युभ्वाद्यधिकरणस्य सारं संगृह्णीत।
2. अक्षराधिकरणस्य सारं यथामति लिखत।

RKMVU/Int MA/San/14-19/UT1/D2016/SK-151

# पञ्चदशी (SK-151)

**Marks-25** **Dates04/08/2016**

==========================================

## A)संक्षेपेण उत्तरत। 1x5=05

1. जाग्रदवस्थायाः लक्षणं किम्?
2. समष्टिलिङ्गशरीराभिमानी कः?
3. श्रुत्यन्तेषु किमुपदिश्यते?
4. कस्मात् धीन्द्रियपञ्चकं जायते?
5. मायाविद्ययोः कः भेदः?
6. विद्यारण्यस्य गुरुः कः?
7. कः प्रतिबन्धो नाम?

## B)नातिविस्तरेण उत्तरत। 3x5=15

1. तथा स्वप्नेऽत्र वेद्यं तु------------।
2. तत्प्रेमात्मार्थमन्यत्र ------------।
3. प्राज्ञस्तत्राभिमानेन -------------।
4. अविद्यावशगस्त्वन्यः-----------।
5. इयमात्मा परानन्दः------------।
6. तथा स्वप्नेऽत्र वेद्यं तु------------।
7. सुप्तोत्थितस्य सौषुप्ततमः--------।

## C) लघूपन्यासं कुरुत। 5x1=05

1. तिसृष्वप्यस्थासु संविदेकत्वमुपपादयत।
2. आत्मनः परमप्रेमास्पदत्वं ससन्दर्भं व्याख्यात।

RKMVU/Int MA/San/12-17/UT1/D2016/SK-167

# सिद्धान्तलेशसंग्रहः (SK-167)

**Marks-25** **Date-02/08/2016**

=======================================

## A) संक्षेपेण उत्तरत। 1x5=05

1. विधिविचारःकिमुपनिषद्वाक्यमवलम्ब्य प्रवृत्तः ?
2. प्रकटार्थकारस्य मतानुसारं वेदान्तश्रवणे को विधिः?
3. अपूर्वविधेः लक्षणं किम् ?
4. गुरूपसदनविधिः कः?
5. सिद्धान्तलेशसंग्रहस्य संप्रदायप्राप्तं व्याख्यानं किम् ?
6. आत्मज्ञाने कीदृशं मनः कारणम् ?
7. "व्रीहीन् अवहन्ति", इति कस्य विधेः उदाहरणम् ?

## B)नातिविस्तरेण उत्तरत। 3x5=15

1. वेदान्तश्रवणे प्रकटार्थकारस्य मतम्।
2. मङ्गलश्लोकतात्पर्यम्।
3. परिसंख्याविधेः लक्षणम्।
4. श्रवणविधौ संक्षेपशारीरकमतम्।
5. श्रवणविधौ अपूर्वविधित्वनिराकरणम्।
6. वेदान्तश्रवणविधौ श्रवणादीनां त्रयाणामपि नियमविधिः।

## C) लघूपन्यासं कुरुत। 5x1=05

1. वेदान्तश्रवणस्य नियमविधित्वे तत्रोक्तावान्तरभेदं यथाग्रन्थं संक्षिपत।

RKMVU/Int MA/San/UT-1/12-17/D2016/SK-171

# SK-171 अद्वैतसिद्धिः (आदितः दृश्यत्वहेत्वन्तः भागः)

**कालावधिः - होरा** **दिनाङ्कः 06-08-2016** **पूर्णाङ्काः - 25**

---

## A)अष्टानाम् एकेन वाक्येन समाधानं लिखत। 1*8=8

1. उपपादनं नाम किं?
2. वादः नाम कः?
3. जल्पः नाम कः?
4. वितण्डा नाम का?
5. विप्रतिपत्तिः नाम कः?
6. साध्याभावनिश्चयवति हेतुसन्देहे ………..।
7. विमतमिति पदं ……..........प्रायेण।
8. "मिथ्याशब्दः.................." इति पञ्चपादिका।
9. साध्यवैकल्यं नाम किं?
10. श्रद्धाधनेन मुनिना........। (श्लोकं पूरयत।)

## B)संक्षेपेण उत्तरत। 4*3=12

1. विप्रतिपत्तेः विचाराङ्गत्वे पूर्वपक्षं साधयत।
2. पक्षतावच्छेदकविचारमुपस्थापयत।
3. प्रपञ्चमिथ्यात्वानुमानस्थं विमतमिति पदं विमृशत।
4. प्रथममिथ्यात्वलक्षणे पूर्वपक्षम् साधयत।
5. पक्षता इति विषयं विवेचयत।

## C)एकं विशदयत। 5*1=5

1. प्रथममिथ्यात्वलक्षणे पूर्वपक्षम् उपस्थाप्य खण्डयत।
2. मायाकल्पितमातृता इति मङ्गलं व्याख्यात।
3. प्रथममिथ्यात्वलक्षणे सिद्धान्तपक्षं साधयत।

RKMVU/Int MA/Sans/15-20/D2016/UT1/SK-209

## SK-209 सिद्धान्तकौमुदीकारकम्

**कालावधिः - एकहोरा** **दिनाङ्कः 8/8/2016** **पूर्णाङ्काः - 25**

### A)सप्तसु पञ्चैव समाधेयाः। 1*5=5

1. सम्बोधने का विभक्तिः भवति।
2. उपोऽधिके च इति सूत्रेण किं विधीयते।
3. भक्तः हरिं भजति इत्यत्र केन सूत्रेण द्वितीया।
4. अनु हरिं सुराः इत्यत्र केन सूत्रेण द्वितीया।
5. कर्मप्रवचनीयाः इत्यस्य कोऽर्थः।
6. कृष्णं सर्वतः गोपाः सन्ति इत्यत्र केन द्वितीया।
7. अन्तरान्तरेण योगे का विभक्तिः भवति।

### B)चतुर्षु द्वयं समाधत्त। 5*2=10

1. अधिशीङ्स्थासां कर्मेति सूत्रस्य व्याख्या कार्या।
2. अभिनिविशश्चेति सूत्रस्य व्याख्या कार्या।
3. कालाध्वनोरत्यन्तसंयोगे इति सूत्रस्य व्याख्या कार्या।
4. उभसर्वतसः.....ततोऽन्यत्रापि इति पद्यं सम्पूर्णं विलिख्य व्याख्येयम्।

### C)त्रिषु एकं समाधत्त। 1*10=10

1. कारके इति सूत्रस्य व्याख्या कार्या।
2. तथायुक्तं चानीप्सितम् इति सूत्रस्य व्याख्या कार्या।
3. कर्तुरीप्सिततमं कर्म इति सूत्रस्य व्याख्या कार्या।

# SK-215 सिद्धान्तकौमुदीस्त्रीप्रत्ययप्रकरणम्

**कालावधिः - एकहोरा** **दिनाङ्कः 05/8/2016** **पूर्णाङ्काः - 25**

## A)सप्तसु पञ्चैव समाधेयाः। 1*5=5

1. मनः इति सूत्रस्य किमुदाहरणम्।
2. त्रिविधलिङ्गस्य लौकिकं लक्षणं लिख।
3. कर्त्री इत्यत्र कः स्त्रीप्रत्ययः केन च सूत्रेणास्ति।
4. प्रतीची इत्यत्र केन सूत्रेण ङीप् प्रत्ययः।
5. नरिका इत्यस्य कः विग्रहः।
6. त्रिविधलिङ्गस्य शास्त्रीयं लक्षणं लिखन्तु।
7. अमूला इत्यत्र कः स्त्रीप्रत्ययः केन च भवति।

## B)त्रिषु द्वयं समाधत्त। 5*2=10

1. उगितश्चेति सूत्रस्य व्याख्या कार्या।
2. वनो र चेति सूत्रस्य व्याख्या कार्या।
3. अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति, इति ग्रन्थस्याशयं लिख।

## C)द्वयोरेकं समाधत्त। 1*10=10

1. अजाद्यतष्टाप् इति सूत्रस्य यथाग्रन्थं व्याख्या कार्या।
2. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रं व्याख्यात।

RKMVU/Int MA/San/12-17/D2016/UT1/SK-225

# SK-225 वैयाकरणसिद्धान्तकौमुदी-आत्मनेपदप्रकरणम्

**कालावधिः - एकहोरा** **दिनाङ्कः- 1/8/2016** **पूर्णाङ्काः - 25**

## A)षट् समाधेयाः। 1*6=6

1. रथेन सञ्चरते इत्यत्र केन सूत्रेण आत्मनेपदम्।
2. परिव्यवेभ्यः क्रियः इति सूत्रं किमर्थम्।
3. निविशते इत्यत्र केन सूत्रेण आत्मनेपदम्।
4. वेः पादविहरणे इति सूत्रस्य उदाहरणं लिख।
5. माणवकमनुक्रीडति इत्यत्र अनोः कर्मप्रवचनीयसंज्ञा केन।
6. यमो गन्धने इति सूत्रे गन्धनं नाम किम्।
7. कृष्णाय शपते इत्यत्र केन आत्मनेपदम्।
8. गोपी कृष्णाय तिष्ठते इत्यत्र केन आत्मनेपदम्।

## B)पञ्चसु त्रयः समाधेयाः। 3*3=9

1. कर्तरि कर्मव्यतिहारे इति सूत्रस्य सोदाहरणं व्याख्यां कुरुत।
2. न गतिहिंसार्थेभ्यः इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।
3. समवप्रविभ्यः स्थः इति सूत्रस्य सोदाहरणं व्याख्यां कुर्वन्तु।
4. उपपराभ्याम् इति सूत्रस्य सोहादरणं व्याख्या कार्या।
5. वृत्तिसर्गतायनेषु क्रमः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

## C)चतुर्षु द्वयं समाधत्त। 5*2=10

1. कर्तृस्थे चाशरीरे कर्मणि इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
2. आङो दोऽनास्यविहरणे इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
3. गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयेगेषु कृञः इति सूत्रं सोदाहरणं व्याख्यात
4. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रेषु वदः इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

# SK-236 – लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता

**समयः – एकहोरा** **पूर्णाङ्काः – २५**

## A)एकादश समाधेयाः १*११=११

1. अष्टाध्यायीसूत्रस्य क्रमः 1/3/7 इति चेत् किं बोधयति?
2. लघुसिद्धान्तकौमुद्या मङ्गलश्लोकं लिखत?
3. प्रत्याहारसंज्ञाविधायकं सूत्रं किम्?
4. अच्प्रत्याहारेण केषां वर्णानां ग्रहणम्?
5. अणुदित्सूत्रे अण् इत्यनेन केषां वर्णानां ग्रहणम्?
6. ऌकारस्य द्वादश भेदाः, कुतः?
7. आभ्यन्तप्रयत्नः कतिविधः?
8. किं नाम उपदेशः?
9. संयोगसंज्ञा कस्य, सूत्रं किम्?
10. अणुदित्सूत्रे उदितः के?
11. ऋकारेण कति वर्णा गृह्यन्ते?
12. लघुसिद्धान्तकौमुद्याः प्रणेता कः?
13. लोप इत्यस्य कः अर्थः?
14. स्पर्शाः के?
15. सवर्णसंज्ञा कस्य/कयोः भवति?

## B)त्रयः समाधेयाः ३*३=९

1. आभ्यन्तरप्रयत्नस्य परिचयो देयः।
2. माहेश्वराणि सूत्राणि लिखत।
3. वर्णानामुच्चारणस्थानानि निर्दिशत।
4. तालिकया इवर्णस्य भेदान् प्रदर्शयत।
5. हकारस्य एकारस्य च आभ्यन्तरप्रयत्नं बाह्यप्रयत्नं च लिखत।

## C)यथेच्छमेकमुत्तरत। ५*१=५

1. आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।
2. तुल्यास्यप्रयत्नं सवर्णमिति सूत्रस्य व्याख्यानं कुरुत।

☆☆☆☆☆

# SK-236 लघुसिद्धन्तकौमुदी अजन्तपुंलिङ्गान्ता

**समयः - होरा** **पूर्णाङ्कः - २५**

## A)नव समाधेयाः। १*९=९

1. लघुसिद्धान्तकौमुद्याः मङ्गलाचरणं किम्।
2. माहेश्वरसूत्राणि कानि।
3. माहेश्वरसूत्राणां प्रयोजनं किम्।
4. लण् इति सूत्रे कति इत्संज्ञकाः वर्णाः, के च ते।
5. इत्संज्ञाविधायकं सूत्रं किम्।
6. लोप इत्यस्य कः अर्थः।
7. इत्संज्ञायाः फलं किम्।
8. हश् इति संज्ञायाः संज्ञिनः के।
9. ह्रस्वदीर्घप्लुतसंज्ञाविधायकं सूत्रं किम्।
10. समाहारः स्वरितः इति सूत्रे समाहारः केषाम्।
11. मुखनासिकावचन इति पदस्य कः अर्थः।
12. तुल्यास्यप्रयत्नं सवर्णमिति सूत्रे संज्ञासंज्ञिनिर्देशः कार्यः।

## B)यथेच्छं द्वयं समाधेयम्। ३*२=६

1. आभ्यन्तरप्रयत्नस्य परिचयः देयः।
2. बाह्यप्रयत्नस्य परिचयो देयः।
3. उच्चारणस्थानानां विवरणं देयम्।

## C)अन्यतरः समाधेयः। १०*१=१०

1. आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।
2. तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।

RKMVU/DSS/Int MA/UT1/13-18/D2016 – SK-255

# SK-255 (परिभाषेन्दुशेखरे आदितः पञ्चाशत् परिभाषाः)

**समयावधिः-एकहोरा** **सत्रम् ७** **पूर्णाङ्काः-२५**

---

## A)दश समाधेयाः १ x १० = १०

1. विशेषप्रतिपत्तिरित्यस्य कोऽर्थः?
2. अलक्षणं नाम किम्?
3. यथोद्देशशब्दस्य कोऽर्थः प्रवृत्तिः कस्मिन् मते?
4. कार्यकालशब्दस्य कोऽर्थः?
5. अनेकान्ता अनुबन्धा इत्यत्र अनेकान्तत्वं नाम किम्?
6. एकान्ता अनुबन्धा इत्यत्र किम् अनुमानम्?
7. नानुबन्धकृतमसारूप्यम् इत्यस्य अर्थं लिखत।
8. नानुबन्धकृतमसारूप्यम् इत्यत्र ज्ञापकं किम्?
9. उभयगतिः इत्यत्र क्व अकृत्रिमस्य क्व कृत्रिमस्य इति निर्णयः कथम्?
10. सर्वे सर्वार्थवाचका इति केषां दृष्ट्या?
11. उभयगतिरिति परिभाषा कुत्र भाष्ये स्पष्टीकृता?
12. कार्यम् अनुभवन् इत्यस्य ज्ञापकं किम्?

## B)यथाभीष्टम् एकां परिभाषां व्याख्यात ५ x १ = ५

1. नानुबन्धकृतमनेजन्तत्वम्
2. उभयगतिरिह भवति

## C)यथाभीष्टम् एकां परिभाषां व्याख्यात १० x १ = १०

1. यथोद्देशं संज्ञापरिभाषम्
2. यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते।

**RKMVU/DSS/Int MA/UTI/12-17/D2016/SK-257**

# SK-257 (परिभाषेन्दुशेखरे ५१तः अन्तिमं यावत्)

**समयावधिः-एकहोरा** **सत्रम् ९** **पूर्णाङ्काः-२५**

---

## A)दश समाधेयाः १ x १० = १०

1. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यत्र किं ज्ञापकम्?
2. प्रातिपदिकग्रहणे इत्यत्र अपिना किं सिध्यति?
3. विभक्तौ लिङ्गविशिष्टाग्रहणम् इत्यत्र किं ज्ञापकम्?
4. सूत्रे लिङ्गवचनमतन्त्रम् इत्यस्य फलं किम्?
5. नञिवयुक्तमिति परिभाषाया अर्थः कः?
6. सदृशशब्दस्य भेदघटितलक्षणं सम्भवति उत नेति युक्त्या प्रतिपादयत।
7. ओषधेश्च इत्यत्र विभक्तिग्रहणेन किम्?
8. गतिकारकोपपदानाम् इति परिभाषायाः सामान्यार्थः कः?
9. नागेशस्य मते गतिकारकोपपदानाम् इति अनित्या उत नित्या?
10. साम्प्रतिकाभावे भूतपूर्वगतिः इति परिभाषायाः कोऽर्थः?
11. गोमत्यतेः क्विपि गोमान् इत्यत्र नुम् कथम्?
12. जक्षित्यादयः इत्यत्र कतीनां धातूनां ग्रहणम्?

## B)यथाभीष्टम् एकां परिभाषां व्याख्यात ५ x १ = ५

1. नञिवयुक्तमन्यसदृशाधिकरणे
2. बहुव्रीहौ तद्गुणसंविज्ञानम्

## C)यथाभीष्टम् एकां परिभाषां व्याख्यात १० x १ = १०

1. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्
2. गतिकारकोपपदानां कृद्भिः सह समासवचनम्

RKMVU/Int MA/Sans/12-17/D2016/UT1/SK-267

# SK-267 लघुशब्देन्दुशेखरकारकम्

**कालावधिः - एकहोरा** **दिनाङ्कः 02/8/2016** **पूर्णाङ्काः - 25**

---

## A)सप्तसु पञ्चैव समाधेयाः। 1*5=5

1. कर्तृतृतीयायाः अर्थः कः।
2. विप्राय ददाति इति वाक्यस्य कोऽर्थः।
3. संयोगसम्बन्धावच्छिन्नाधारस्य शेषत्वेन विवक्षा भवति नवेति।
4. दूरार्थकेभ्यः शब्देभ्यः कस्मिन्नर्थे सप्तमी भवति।
5. अधिकरणसप्तम्याः कः अर्थः।
6. इको यणचि इत्यत्र कस्मिन् अधिकरणे सप्तमी विभक्तिः।
7. आयातेः कः अर्थः।

## B)त्रिषु द्वयं समाधत्त। 5*2=10

1. कारके इति सूत्रस्य व्याख्या कार्या।
2. स्वतन्त्रः कर्ता इति सूत्रस्य व्याख्या कार्या।
3. शेषे षष्ठी इति सूत्रस्य व्याख्या कार्या।

## C)द्वयोरेकं समाधत्त। 1*10=10

1. आधारोऽधिकरणम् इति सूत्रस्य व्याख्या कार्या।
2. साधकतमं करणम् इति सूत्रस्य व्याख्या कार्या।

# SK-344 न्यायसिद्धान्तमुक्तावली

**कालावधिः - एकहोरा** **दिनाङ्कः 07/8/2016** **पूर्णाङ्काः - 25**

## A)सप्तसु पञ्चैव समाधेयाः। 1*5=5

1. चूडामणीकृतविधुः इत्यस्य विग्रहवाक्यं लिखन्तु।
2. नव्यानां मते मङ्गलस्य फलं किम्।
3. प्राचीनमते मङ्गलस्य द्वारं किम्।
4. आशा नाम किम्।
5. मुक्तावल्याः प्रथमं मङ्गलपद्यं लिखन्तु।
6. कारिकावल्याः प्रणेता कः।
7. मुक्तावल्याः प्रणेता कः।

## B)त्रिषु द्वयं समाधत्त। 5*2=10

1. शक्तेः पदार्थत्वं व्युत्पाद्य खण्डयन्तु।
2. सादृश्यस्य पदार्थत्वं व्युत्पाद्य खण्डयन्तु।
3. तमसः द्रव्यत्वं व्युत्पाद्य खण्डयन्तु।

## C)द्वयोरेकं समाधत्त। 1*10=10

1. कारिकावलीमङ्गलपद्यस्य व्याख्यां विधाय ईश्वरसिद्धिप्रक्रियां लिखन्तु।
2. द्रव्यत्वजातिसिद्धिप्रक्रियां लिखन्तु।

RKMVU/Int MA/Sans/13-18/D2016/UT1/SK-345

# SK-345 न्यायसिद्धान्तमुक्तावली

**कालावधिः - एकहोरा** **दिनाङ्कः 02/8/2016** **पूर्णाङ्काः - 25**

---

**A)सप्तसु पञ्चैव समाधेयाः।** 1*5=5

1. किं नाम रुढम्।
2. इह सहकारतरौ मधुरं पिको रौतीत्यत्र पिकपदस्य कोऽर्थः।
3. नैयायिकमते नीलादिपदानां कुत्र शक्तिः कुत्र च लक्षणा।
4. नश्यति इत्यत्र आख्यातस्य कुत्र लक्षणा।
5. तिङां व्यापारे शक्तिः इति केषां मतम्।
6. नैयायिकैः आख्यातस्य कुत्र शक्तिः स्वीक्रियते।
7. ज्ञायमानं लिङ्गमनुमितौ करणमिति केषां मतम्।

**B)त्रिषु द्वयं समाधत्त।** 5*2=10

1. योगरूढयौगिकरूढयोः स्वरूपं लिखन्तु।
2. वाक्यशेषात् विवरणाच्च कथं शक्तिग्रहो भवतीति लिखन्तु।
3. अनुमितिप्रक्रियां लिख।

**C)द्वयोरेकं समाधत्त।** 1*10=10

1. शाब्दबोधप्रक्रियां विलिख्य शक्तिस्वरूपं लिखन्तु।
2. पदानां जातौ शक्तिः व्यक्तौ वेति यथाग्रन्थं लिखन्तु।

RKMVU/DSS/Int MA/16-21/D2016/UT1/SK-411

# SK-411 रघुवंशम्

**A)दश समाधत्त।** **1x10=10**

1. रघुवंशम् इत्यत्र विग्रहः कथम्?
2. आफलोदयकर्मणाम् इत्यस्य समासः कथम्?
3. मनुः केन उपमितः?
4. मनुः कस्य पुत्रः?
5. रघुवंशीयाः किमर्थं मितभाषिणः?
6. कविः किमर्थं पार्वतीपरमेश्वरौ वन्दते?
7. पूर्वसूरिपदेन कालिदासः कान् अवदत्?
8. रघुवंशस्य प्रसिद्धा टीका का?
9. सूर्यवंशीयाः कथं देहं त्यजन्ति स्म?
10. कालिदासस्य द्वे महाकाव्ये के?
11. रघुवंशस्य प्रसिद्धः टीकाकर्ता कः?
12. लोके राज्ञाम् आदिमः कः?

**B)श्लोकान् पूरयत।** **3x5=15**

1. त्यागाय ……..॥
2. तं सन्तः……..॥
3. अथवा ………॥
4. क्व सूर्यः …….॥
5. सोऽहम् ……..॥
6. शैशवे ……….॥
7. मन्दः ……….॥

## RKMVU/Int MA/San/2015-20/UT -1/D16/SK-413

## SK-413 – अभिज्ञानशाकुन्तले आदितः चत्वारः अङ्काः

**कालावधिः -होरा** **पूर्णाङ्काः – 25**

**A)यथेच्छं पञ्च प्रश्नाः समाधेयाः।** 1*5 =5

1. अभिज्ञानशाकुन्तलमित्यस्य विग्रहं लिखत।
2. शाकुन्तले कः प्रधानो रसः?
3. नेपथ्यं नाम किम्?
4. यया प्राणिनः प्राणवन्तः इति वाक्यांशेन किं व्यज्यते?
5. स्रग्धराछन्दसो लक्षणं लिखत।
6. सूत्रधारः कः?
7. शाकुन्तले का प्राकृतभाषा कविना प्रयुक्ता?

**B)अधस्तनयोर्व्याख्यां कुरुत।** **5*2**=10

1. प्रस्तावनानुसारं ग्रीष्मकालं वर्णयत।
2. आपरितोषादिति श्लोकं व्याख्यात।

**C)द्वयोरेकं प्रपञ्चयत।** **10*1**=10

1. अभिज्ञानशाकुन्तलस्य मङ्गलश्लोकं व्याख्यात।
2. अभिज्ञानशाकुन्तलस्य मङ्गलश्लोकस्य नान्दीत्वं विचारयत।

*************

RKMVU/Int MA/San/15-20/UT1/ D2016/SK-441

SK-441 - साहित्यदर्पणः

**कालावधिः - एकहोरा** **पूर्णाङ्काः - 25**

## A)वाक्येनैकेन उत्तरं लिखत। 1x5=5

1. साहित्यदर्पणस्य फलवत्त्वं कथम्?
2. काव्यात् अर्थप्राप्तिः कथम्?
3. कीदृशेन साधारण्येन काव्यता अङ्गीकरणीया?
4. विधेयाविमर्शदोषस्य स्वरूपं किम्?
5. कस्य मते रीतिः काव्यात्मा?
6. अनित्याः दोषााः के?
7. शरदिन्दसुन्दररूचिः, कथं विग्रहः?

## B)संक्षेपेण उत्तरत। 3x5=15

1. न्यक्कारो ह्ययमेव इत्यादिपद्ये विधेयाविमर्शदोषं दर्शयत।
2. काव्यलक्षणे सगुणौ इत्युच्यते चेत् का हानिः?
3. वक्रोक्तिः काव्यजीवितमिति न युक्तं, कुतः?
4. मङ्गलश्लोकार्थं लिखत।
5. काव्ये रसः प्रधानः इत्यत्र किं किं प्रमाणवाक्यं श्रुयते?
6. भामहोक्तं काव्यप्रयोजनं विवृणुत।
7. काव्यपुरुषस्य शरीरादिकं विवृणुत।

## C)एकं विशदयत। 5x1=5

1. काव्यलक्षणे अदोषौ इति विशेषणं न युक्तम्।
2. काव्यप्रयोजनानि।

***

# SK- 521 (संस्कृतभाषाप्रवेशः)

**कालावधिः- एकहोरा** **दिनाङ्कः- 30.08.2016** **पूर्णाङ्काः-25**

## A)यथेच्छं दशप्रश्नानाम् उत्तरं लिखन्तु। 1*10= 10

1. देवाः श्रेष्ठान् भक्तान् रक्षन्ति। (क्तप्रत्यययोगेन परिवर्तयन्तु)
2. पण्डिताः बहून् गुणान् वर्णयन्ति। (शानच्प्रत्यययोगेन परिवर्तयन्तु)
3. तरुणौ शिष्यौ वृद्धम् गुरुम् पृच्छतः। (कर्मणि लिखन्तु)
4. प्रचण्डाः अग्नयः आहुतीन् नयन्ति। (कृद्योगेन परिवर्तयन्तु)
5. मुञ्चन्ति निषादाः वने बाणान्। (शतृप्रत्यययोगेन परिवर्तयन्तु)
6. सः रामः मित्राणि रक्षति। (शतृप्रत्यययोगेन परिवर्तयन्तु)
7. भवतः नाम किम्।( वाच्यपरिवर्तनं कुर्वन्तु)
8. क्रूराः दैत्याः मुनीन् विस्मरन्ति। (कृद्योगेन परिवर्तयन्तु)
9. मातरः उमाः काञ्चीम् गच्छन्ति। (क्तवतुप्रत्यययोगेन परिवर्तयन्तु)
10. पाचकाः कठिनान् तण्डुलान् पचन्ते। (शानच्प्रत्यययोगेन परिवर्तयन्तु)
11. चपलाः सर्पाः स्थूलान् मण्डूकान् भक्षयन्ति। (कर्मणि लिखन्तु)
12. अर्चकाः विष्णोः विग्रहान् स्पृशन्ति। (क्तवतुप्रत्यययोगेन परिवर्तयन्तु)
13. भगवान् शिवः विषम् पिबति। (शतृप्रत्यययोगेन परिवर्तयन्तु)

## B)यथेच्छं षट्-शब्दानां रूपाणि लिखन्तु। 1*6=6

1. नदीशब्दस्य तृतीया।
2. भगवत्-शब्दस्य द्वितीया।
3. कविशब्दस्य चतुर्थी।
4. अस्मद्-शब्दस्य चतुर्थी।
5. साधुशब्दस्य पञ्चमी।
6. युस्माद्-शब्दस्य द्विताया।
7. मरुत्-शब्दस्य षष्ठी।
8. गुणिन्-शब्दस्य प्रथमा।

## C)यथेच्छं त्रयाणां धातूनां रूपाणि लिखन्तु। 3*3=9

1. पठ्धातोः लोट्लकारः।
2. भूधातोः लङ्लकारः।

3. अस्धातोः लङ्लकारः।

4. लभ्धातोः कर्मणि लट्लकारः।

5. सेव्धातोः कर्मणि लोट्लकारः।

RKMVU/DSS/Int MA/16-21/D2016/UT-1/SK- 521 - WW

## SK- 521 (संस्कृतभाषाप्रवेशः)

**कालावधिः- 20 मिनट्** **दिनाङ्कः- 23.08.2016** **पूर्णाङ्काः- 10**

**A)यथेच्छं दशप्रश्नानाम् उत्तरं लिखन्तु।** **1*10= 10**

1. देवाः श्रेष्ठान् भक्तान् रक्षन्ति। (क्तप्रत्यययोगेन परिवर्तयन्तु)
2. पण्डिताः बहून् गुणान् वर्णयन्ति। (शानच्प्रत्यययोगेन परिवर्तयन्तु)
3. तरुणौ शिष्यौ वृद्धम् गुरुम् पृच्छतः। (कर्मणि परिवर्तयन्तु)
4. प्रचण्डः अग्निः आहुतिम् नयति। (कृद्योगेन परिवर्तयन्तु)
5. मुञ्चति निषादः वने बाणम्। (शानच्प्रत्यययोगेन परिवर्तयन्तु)
6. सः रामः मित्राणि रक्षति। (क्तप्रत्यययोगेन परिवर्तयन्तु)
7. देवाः इन्द्राः मेघात् जलम् वर्षन्ति। (कर्मणि परिवर्तयन्तु)
8. क्रूराः दैत्याः मुनीन् विस्मरन्ति। (कृद्योगेन परिवर्तयन्तु)
9. माता उमा काञ्चीम् गच्छति। (क्तवतुप्रत्यययोगेन परिवर्तयन्तु)
10. मानवाः महतीम् कीर्तिम् अर्जन्ति। (क्तप्रत्यययोगेन परिवर्तयन्तु)
11. चपलाः सर्पाः स्थूलान् मण्डूकान् भक्षयन्ति। (कर्मणि परिवर्तयन्तु)
12. अर्चकाः विष्णोः विग्रहान् स्पृशन्ति। (क्तवतुप्रत्यययोगेन परिवर्तयन्तु)
13. भगवान् शिवः विषम् पिबति। (क्तप्रत्यययोगेन परिवर्तयन्तु)

RKMVU/DSS-WW/Int MA/16-19/UT-1/SK-521

## SK-521 (संस्कृतभाषाप्रवेशः)

**कालावधिः - एकहोरा** **दिनाङ्कः १०.८.२०१६** **पूर्णाङ्काः - 25**

## A) यथारुचि दशोत्तराणि लिखत। 1*10=10

1. वयं पर्वतम् आरोहामः। (कर्मणिप्रयोगेन वाक्यं परिवर्तयन्तु।)
2. अहं पार्वतीं वन्दे। (कृद्योगेन वाक्यं परिवर्तयन्तु।)
3. ज्ञानम् अज्ञानं नाशयति। (क्तप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
4. अगस्त्यः समुद्रं पिबति। (क्तवतुप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
5. विहगाः वनात् फलानि आहरन्ति। (कर्मणिप्रयोगेन वाक्यं परिवर्तयन्तु।)
6. दावानलः वनं दहति। (क्तप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
7. नृपाः राज्यं रक्षन्ति। (क्तवतुप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
8. बालकौ श्लोकार्थम् अवगच्छतः। (कृद्योगेन वाक्यं परिवर्तयन्तु।)
9. पितामही कथां वर्णयति। (कर्मणिप्रयोगेन वाक्यं परिवर्तयन्तु।)
10. युवां वेदपाठं शृणुथः। (क्तवतुप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
11. यूयं तण्डुलान् पचथ। (क्तप्रत्यययोगेन वाक्यं परिवर्तयन्तु।)
12. वयं पुण्यम् इच्छामः। (कर्मणिप्रयोगेन वाक्यं परिवर्तयन्तु।)
13. छात्रौ गृहं विस्मरतः। (कृद्योगेन वाक्यं परिवर्तयन्तु।)

## B) यथेच्छं दश प्रश्नान् उत्तरत। 1*10=10

1. अस्मद्-शब्दस्य पञ्चमीविभक्तेः रूपाणि।
2. युष्मद्-शब्दस्य चतुर्थीविभक्तेः रूपाणि।
3. तत्-शब्दस्य पुंलिङ्गे सप्तमीविभक्तेः रूपाणि।
4. सर्वशब्दस्य स्त्रीलिङ्गे सप्तमीविभक्तेः रूपाणि।
5. सर्वशब्दस्य पुलिङ्गे षष्ठीविभक्तेः रूपाणि।
6. भूधातोः लिटि उत्तमपुरुषे रूपाणि।
7. अद्-धातोः विधिलिङि प्रथमपुरुषे रूपाणि।
8. आत्मनेपदिनः कृधातोः लोटि उत्तमपुरुषरूपाणि।
9. परस्मैपदिनः कृधातोः लुङि प्रथमपुरुषरूपाणि।
10. आत्मनेपदिनः कृधातोः लिटि मध्यमपुरुषरूपाणि।
11. सेव्-धातोः लङि प्रथमपुरुषरूपाणि।

12. शीङ् -धातोः लटि प्रथमपुरुषरूपाणि।

**C)कोष्ठकबद्धप्रातिपदिकानां यथायथविभक्तियोजनेन वाक्यं पूरयत (यथेच्छं पञ्चानाम्) 1*5=5**

1. .................. (बालक) ....................... (शिशु) सह क्रीडन्ति।
2. ................. (जननी) .......................... (शिशु) भोजनं यच्छति।
3. ........................ (कर्मकर) ........................ (वृक्ष) जलेन सिञ्चन्ति।
4. ......................... (वृक्ष) ........................ (फल) पतन्ति।
5. ........................ (ग्राम) समीपे अरण्ये ...................... (पशु) सन्ति।
6. ..................(बालिका) सुन्दराणि ................. (पुष्प) पश्यति।
7. ...................... (नदी) .................. (मत्स्य) वसन्ति।